## लोपः शाकल्यस्य । (१९/१६७)

[1]वकारयकारयोः पदान्तयोः अवर्णपूर्वयोः लोपो भवति शाकल्यस्य आचार्यस्य मतेन अशि परतः । क आस्ते, कयास्ते । काक आस्ते, काकयास्ते । अस्मा उद्धर, अस्मायुद्धर । द्वा अत्र, द्वावत्र[2] । असा आदित्यः, असावादित्यः । [3]शाकल्यग्रहणं विभाषार्थम् । तेन यदाऽपि लघुप्रयत्नतरो न भवति आदेशः, तदापि व्योः[4] पक्षे श्रवणं [5]भवति ॥

## ओतो गार्ग्यस्य । (२०/१६०)

ओकारादुत्तरस्य[6] यकारस्य लोपो भवति गार्ग्यस्याचार्यस्य मतेन अशि परतः । भो अत्र । भगो अत्र । भो इदम् । [7]भगो इदम् । [8]नित्यार्थोऽयमारम्भः । गार्ग्यग्रहणं पूजार्थम् । योऽयम[9]लघुप्रयत्नस्य विकल्पेन लोपः क्रियते सोऽनेन निवर्त्यते । लघुप्रयत्नतरः तु भवत्येव यकारः । भो अत्र, भोयत्र । भगो अत्र, भगोयत्र । अघो अत्र, अघोयत्र । केचित्तु सर्वमेव यकारमत्र नेच्छन्ति ॥

## उञि च पदे । (२१/१७०)

अवर्णपूर्वयोः व्योः पदान्तयोर्लोपो भवति उञि च पदे परतः । 'स उ [10]एकविंशवर्तनिः' (मं.२.७.२०) । स उ [11]एकाग्निः । पदे इति किम् ? तन्त्र उतम्, तन्त्रयुतम्[12] । वेञः सम्प्रसारणे कृते उञिति भूतपूर्वेण अकारेण शक्यते प्रतिपत्तुम् इति । अथ [13]उञ् इत्येवंरूपो निपातः प्रतिपदोक्तोऽस्ति ? तदा लाक्षणिकत्वाद् वेञादेशस्य ग्रहणमिह नास्ति, उत्तरार्थं पदग्रहणं क्रियते ॥

## हलि सर्वेषाम् । (२२/१७१)

हलि परतः भोभगोअघोअपूर्वस्य यकारस्य पदान्तस्य लोपो भवति सर्वेषामाचार्याणां मतेन । भो हसति । भगो हसति । अघो हसति । भो याति । भगो याति । अघो याति । [14]वृक्षा हसन्ति[15] । सर्वेषांग्रहणं शाकटायनस्यापि [16]लोपो यथा स्यात्, लघुप्रयत्नतरो मा भूत् इति ॥

## मोऽनुस्वारः । (२३/१२२)

मकारस्य पदान्तस्य [17]अनुस्वारः आदेशो भवति हलि परतः । कुण्डं हसति । [18]वनं हसति । कुण्डं याति । [19]वनं याति । हलि इत्येव, [20]त्वमत्र । किमत्र । पदान्तस्य इत्येव, गम्यते । [21]रम्यते ॥

---

1. व्योः पदान्तयोः क. इ, व्योः इत्येव इत्यधिकम् ह. 2. द्वा आनय द्वावानय इत्यधिकम् क. 3. अत्र इत्यधिकम् क. 4. लोपो भवति इत्यधिकम् क. 5. भवत्येव ड. इ. ह. 6. पदान्तस्य इत्यधिकम् इ. 7. अघो अत्र इत्यधिकम् ड. इ. 8. अघो इदम् इत्यधिकम् इ. 9. लघुप्रयत्नतरो यकारः यश्च तस्य लोपविकल्पः सोऽनेन ब. इ. ह. 10. एकविंशतिः मुद्रितः पाठः 11. स उ एकाग्निलावुत्तिष्ठतः ह, स उ गृकाग्निः ब. 12. द्वा उतम् इत्यधिकम् क. इ. 13. उ इ. 14. अवर्णपूर्वस्य इत्यधिकम् इ, वृक्षो हसति ह. 15. वृक्षा यान्ति इइत्यधिकम् ब. क. इ. 16. आचार्यस्य मते इत्यधिकम् ड. 17. अनुस्वारादेशः क. इ. 18–19. धनं ब. ड. 20. कुण्डमत्र ब. क. ड. 21. यम्यते इत्यधिकम् ह. रम्यते नास्ति क. इ.